**करेनर** पु० तुरुष्कनामगन्धद्रव्ये करेवरोऽप्यत्र राजनि० ।

**करेन्दुक** पु० करेण किरणेनेन्दुरिव भायति कै—क । भूतृणे राजनि० ।

**करोट** न० के शिरसि रोटते रुट्—द्युतौ अच् । शिरोऽस्थ्नि । (माथारखुलि) इन् करोटिरप्यत्र स्त्री वा ङीप् अमरः । "वपुषि भटकरोटिन्यस्तकीलालसिन्धुः" धनञ्ज० ।

**करोटक** पु० नागभेदे "आप्तः करोटकश्चैव शङ्खो वालिशिखस्तथा" भा०आ० ३५ अ० नागनामकीर्त्तने । अत्र कर्कोटार्थाभिधानं प्रामादिकमेव । उपक्रमे ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ" इति कर्कोटकस्य पृथगुक्तेस्ततो भिन्न एवायमिति तत्त्वम् । [ प्रनिकर्कति ।

**कर्क** हासे सौत्रः पर०अक० सेट् । कर्कति अकर्कीत् । चकर्क

**कर्क** पु० कृणोति करोति क्रियते वा कृ—क तस्य नेत्त्वम् कर्क—अच् वा । १वह्नौ २श्वेताश्वे अमरः ३दर्पणे ४घटे ५मेषावधिचतुर्थे राशौ ६कुलीरे ७कर्कटवृक्षे (काँकडाशिङ्गा) च हेम० । ८कात्यायनश्रौतसूत्रभाष्यकारे पु० ।

**कर्कखण्ड** पु० कर्कः श्वेताश्वयुक्तः खण्डः भूमिखण्डो यत्र देशभेदे । "मागधान् कर्कखण्डांश्च निवेश्य विषये त्मनः" भा० व० २५२अ० ।

**कर्कचिर्भिटि** स्त्री कर्कवर्णा चिर्भिटी । कर्कटीभेदे । राजनि० ।

**कर्कट** पु० सौ०कर्क—अटन् । क्षुद्रामलकवत्क्षुद्रफलके १वृक्षभेदे २जलजन्तुभेदे कुलीरे । ( काँकडा ) "गणनाटत् करकर्कटोत्करम्" नैष० राजनि० । ( करकटिया ) ३पक्षिभेदे । ४अलाबूवृन्ते च मेदि० । ५पद्मकन्दे जटा० मेषादितश्चतुर्थे ६राशौ "पादः पुनर्वसोरन्त्यः पुष्योऽश्लेषा च कर्कटः" ज्यो०त०उक्तसपादनक्षत्रद्वयात्मकः । तथा च ३६०अंशात्मके राशिचक्रे ९०अंशोत्तरम् ३० त्रिंशदंशात्मकः स राशिः । "शेषाः स्वनामसदृशाकृतयो भवन्ति" ज्यो०त०उक्तेस्तस्य कुलीराकृतित्वम् । अस्य वर्णाद्युक्तं नील०ता० "बहुप्रजासङ्गपदः कुलीरश्चरोऽङ्गना पाटलहीनशब्दः । शुभः कफी स्निग्धजनोऽम्बुचारी समोदयी विप्रनिशोत्तरेशः" तथा च अस्य बहुप्रजासङ्गिता बहुपदता चरराशित्वं स्त्रीरूपता पाटलवर्णता हीनशब्दता शुभत्वं शुभस्वामिकता च । कफप्रकृतित्वं स्निग्धजनत्वम् जलचरत्वम् समराशित्वम् विप्रवर्णत्वम् निशाबलित्वम् उत्तरदिग्मुखत्वञ्च । अयं च कीटराशिः "कर्कटवृश्चिकमीना धनुषश्चान्त्यार्द्धञ्च कीटसंज्ञाः स्युः" इत्युक्तेः तत्र समत्वं युग्मराशित्वं समपरिमाणञ्च । "ओजोऽथ युग्मं विषमः समश्च" "क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च" इत्युक्तेः "हस्वास्तिनिगोऽविघटा मिथुनधनुःकर्किमृगमुखाश्च समाः" इत्युक्तेश्च । "पृष्ठोदयाविमिथुना दिवा शीर्षोदयाः परे" इत्युक्तेः अस्य शीर्षोदयत्वम् । अस्याधिपः चन्द्रः । कुजशुक्रबुधेन्द्वर्क सौम्यशुक्रावनीभुवाम् ।—क्षेत्राणि स्युरजादयः इत्युक्तेः "मेषकर्कटयोर्मध्ये गाढं तपति भास्करः" तिथि० पु० । "कर्कटे प्रथमं देवी त्र्यहं गङ्गा रजस्वला" स्मृतिः । ( काँकुड ) ७एर्वारौ स्त्री गौरा० ङीष् भावप्र० । तस्याः गुणाः भावप्र० उक्ता यथा । "एर्वारुः कर्कटी प्रोक्ता कथ्यन्ते तद्गुणा अथ । कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः । रुच्या पित्तहरा साऽऽमा पक्वा तृष्णाग्निपित्तकृत्" । अस्याः पाकप्रकारस्तु । "त्वग्बीजरहिता प्रौढ़ा गुलिकाकारखण्डिता । तलिता कुष्टे तप्ते कर्कटी वाचलेहिता । विपाण्डु खण्डं घृतदुग्धसार्द्धं विभावितं वल्लजशर्कराभ्याम् । कृतैलवासञ्च कदुष्णमेतत् प्रतिक्षणं रोचनमातनोति" । ङीषन्तः । ८शाल्मलौ मेदि० । ९सर्पे शब्दरत्ना० । १०देवदालीलतायां १२घोषिका १३वृक्षे राजनि० । १४कर्कटजातिस्त्रियाञ्च । "यथा च कर्कटी गर्भमाधत्ते मृत्युमात्मनः" भा०विरा० २७२श्लो० । कर्कटस्य कोषस्थता तन्मांसगुणाश्च भावप्रका० उक्ता यथा । "शङ्खः शङ्खनखश्चापि शुक्तिसम्बूककर्कटाः । जीवा एवंविधाश्चान्ये कोषस्थाः परिकीर्त्तिताः । कोषस्था मधुराः स्निग्धा वातपित्तहरा हिमाः । "ताम्रचूडकर्कटकृष्णमत्स्यशिशुमारवराहवसाः" सक्षीरं कर्कटरसे सिद्धं चात्र घृतं पिबेत्" सुश्रु० । स्मृतौ चास्याभक्ष्यतोक्ता तच्चाभक्ष्यशब्दे दर्शितम् । कर्कटस्तच्छृङ्गाकारोऽस्त्यस्य अर्श०अच् । तुलाप्रान्तनिखेये कर्कटशृङ्गाकारे आयसे १५कीलकभेदे" पु० मिता० १६कराटके पु० च । तत्पादाग्रतुल्याग्रत्वात्तस्य तथात्वम् । १७कर्कटशृङ्ग्याम् स्त्री ङीष् भाव०प्र० ।

**कर्कटक** न० कर्कटइव कायति कै—क । १यन्त्रभेदे (कम्पास) "फणिमुखकाकलीसंदंशकपुरुषशीर्षकयोगचूर्णयोगवर्त्तिकामानसूत्रकर्कटकरज्जुदीपभाजनभ्रमरकरण्डक प्रभृत्यनेकोपकरणयुक्तः" दशकुमा० । कर्कटः वृक्ष इव कायति कै—क । २इक्षुभेदे शब्दचिन्ता० । स्वार्थे कन् । ३कुलीरे अमरः ।

**कर्कटशृङ्गी** स्त्री कर्कट इव शृङ्गं यस्याः । (कांकडाशिङ्गा) १वृक्षभेदे । स्वार्थे कन् कर्कटशृङ्गिकाप्यत्र । "शृङ्गी